


ISSN : 2229-5577

# सागरिका

अङ्कः 49/2

सागरिका अङ्कः 49/2

सागरिका समिति पंजीयन क्रमांक 876
News Paper's Reg. No. : 13073/67

सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्
मध्यप्रदेशः ( भारतम् )

## जयतु हरिसिंह :

**किरण आर्या**

हरिसिंहो वन्द्यो वन्द्यो जयतु जयतु सदा।
गायन्ति सर्वे यद्गुणगीतम्, अमरो अमरो भवतु सदा।।

हास्य प्रसादः आसीत् सः सिंहः, गौरः खल्वाकर्षकः।
परीक्षासु सर्वासु उत्तीर्णवान् सः पथश्च तस्य संघर्षकः।
मार्गे च तस्य सर्वे चलन्तु, चरितं हि तस्य वदन्तु सदा।।

यो राजशास्त्री, योऽधिवक्ता विधिवेत्ता च यः श्रुतः।
वाक्शक्तियुक्तोऽभिव्यक्तियुक्तः प्रभावशाली दृढलक्ष्ययुक्तः।
वयं तं नमामः, वयं तं भजामः, मनसा स्मरामः, इह सर्वदा।।

वरीयान् यो वाचा, मनसा महीयान् कर्मणा च सः गरीयान्।
महतां जनानामग्रणी बभूव विद्याप्रचारेऽभवच्च श्रेयान्।
कथं न भवेत् सः लोकाभिवन्द्यः सर्वैः प्रशस्यः इह वै मुदा।।

यावज्जीवं सुज्ञानज्योतिः प्रज्वालनीयम् इति विश्रुतः।
लोकोपकारे विद्याप्रचारे सम्मान्यो चाभूल्लोकस्थितः।
धन्या ह भारतमाता च धन्या, प्रज्ञारत्नं प्राप्य सदा।।

गौर-गौरव-गीतिकया उद्धृतं पद्यम्

## होलिकाग़ज़लम्

**राधावल्लभः त्रिपाठी**

रक्तरङ्गे त्वया रञ्जिता चोलिका
एषमः कीदृशी मानिता होलिका।।
अत्र दग्धा गृहा दह्यते देहली।
तत्र साधो त्वया राधिता होलिका।।
मार्गिता नो जना निर्दयं मारिताः।
मार्गते रञ्जनं तेषु ते होलिका।।
साञ्जलिर्दूरतो हा नमोवाक् कृता।
ईदृशी कीदृशी मानिता होलिका।।
देश एषः स एवास्ति किं वल्लभ!
यत्र पूर्वं त्वया साधिता होलिका।।
होली - एक ग़ज़ल
अनुवाद
रङ्ग से खून के रंग दी चोली मेरी
अब के कैसी हुई हाय होली तेरी।
जल गये घर इधर जल रही देहली
और उधर मन रही हाय होली तेरी।
जिनकी हत्या हुई हम उन्हें ढूंढते
मौत में ढूंढती रङ्ग होली तेरी।
दूर से हाथ जोड़े नमस्ते कहा
ऐसे कैसे मनी हाय होली तेरी।
देश क्या है वही ये वल्लभ जहां
पहले मनती रही हाय होली तेरी।

## भवनरः

**रामहेतगौतमः**

जीवति अर्जनाय
अर्जति भोजनाय
भुङ्क्ते जीनाय
तदपि म्रियते जनः।
मृत्युभयाद्येव
जलमन्नं खादसि
तर्हि मर! सम्प्रति
समस्या गमिष्यति
श्रमेणालं यद्धि
मरणं तु निश्चितं।
जीवनमिच्छसि
जीवेः समाजाय
उद्देश्यं धारय
बन्धनात् मोचय
कुरु समाजकार्यं।
स्वोदरं सुतोदरं
पूरयन्ति पशवोऽपि
तर्हि कोऽपि विशेषः
कथय तव जीवने।
मम दृष्ट्या तु
स एव नरः
समाजहितं यः
विचिन्तयति
करोति सदा।
चिन्तय समाजाय
चिन्तय समाजाय
चिन्तय समाजाय
विचिन्त्य, भव नरः।